# Rishi Agastyaproktam Shivarchanopadesham 4

# ઋષિ અગસ્ત્યપ્રોક્તં શિવાર્ચનોપદેશમ્ ૪

## Document Information

Text title : Rishi Agastyaproktam Shivarchanopadesham 4

File name : shivArchanopadesham4.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 28 madhyArjunamahimAnuvarNanam | 283-295||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# ઋષિ અગસ્ત્યપ્રોક્તં શિવાર્ચનોપદેશમ્ ૪

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)

અગસ્ત્યઃ

યઃ પૂજિતઃ સ્તુતો ધ્યાતો વન્દિતોમેશવિગ્રહઃ ।
(યેન ધ્યાતઃ શિવો યસ્તુ વન્દિતોમેશવિગ્રહઃ ।)
સ એવ લભતે ધન્યો મુક્તિકાન્તાકરગ્રહમ્ ॥ ૨૮૩॥

વિલોકયન્તિ સતતં મુક્તિકાન્તાં શિવાર્ચકાઃ ।
સાપિ પશ્યતિ સોત્સાહં શિવારાધનતત્પરાન્ ॥ ૨૮૪॥

મુક્ત્યઙ્ગના વિલોક્યૈવ શિવારાધનતત્પરમ્ ।
નૃત્યત્યત્યન્તસન્તુષ્ટા વલ્લભોઽયં મમેતિ સા ॥ ૨૮૫॥

સ એવ સતતં ધ્યાત્વા પાર્વતીપ્રાણવલ્લભઃ(ભમ્) ।
સ એવ શૈવઃ શુદ્ધાત્મા જાયતે મુક્તિવલ્લભઃ ॥ ૨૮૬॥

સ એવાતિપ્રયત્નેન સમારાધિતશઙ્કરઃ ।
સ એવ વસ્તુતો લોકે મુક્તિકાન્તામનોહરઃ ॥ ૨૮૭॥

મહેશ્વરમુમાકાન્તા(ન્તં) કાલાન્તકમનામયમ્ ।
યઃ પૂજયતિ તસ્યૈવ મુક્તિર્નાન્યસ્ય સર્વથા ॥ ૨૮૮॥

સ્નાત્વાદૌ ભસ્મના દેહમુદ્ધૂલ્યાપાદમસ્તકમ્ ।
પૂજનીયો મહાદેવો લિઙ્ગરૂપી મુમુક્ષુભિઃ ॥ ૨૮૯॥

એવમવ્યભિચારેણ નિત્યમભ્યર્ચિતઃ શિવઃ ।
દદાતિ ભુક્તિં મુક્તિં ચ સત્યં સત્યં ન સંશયઃ ॥ ૨૯૦॥

Shloka no. 291 is either missing or the numbering after no. 290 is incorrect.

ઐશ્વર્યમતુલં ભુક્ત્વા શિવલિઙ્ગાર્ચનાન્મુને ।
પ્રયાતિ શિવસાયુજ્યં નિર્દગ્ધાખિલકલ્પષાઃ(ષઃ) ॥ ૨૯૨॥

કોટિશઃ કૃતપાપોઽપિ સકૃદર્ચિતશઙ્કરઃ ।
પ્રયાતિ શિવસાયુજ્યં પુનરાવૃત્તિવર્જિતમ્ ॥ ૨૯૩॥

શિવપૂજાગ્નિસન્દગ્ધમહાપાતકપર્વતાઃ ।
પીતામૃતાશુચિર્ભૂતાઃ (પીતામૃતાઃ શિવાત્માનઃ)
શિવં યાન્તિ શિવાદૃતાઃ ॥ ૨૯૪॥

સમભ્યર્ચ્ય મહાદેવં સકૃદપ્યાહિતાશયાઃ ।
લબ્ધ્વોપેન્દ્રત્વમિન્દ્રત્વં બ્રહ્મત્વં ચ શિવં યુયુઃ ॥ ૨૯૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે રાજાપ્રતિ ઋષિ અગસ્ત્યપ્રોક્તં શિવાર્ચનોપદેશં ૪ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૮ મધ્યાર્જુનમહિમાનુવર્ણનમ્ । ૨૮૩-૨૯૫॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 28 madhyArjunamahimAnuvarNan
. 283-295..

Notes:

Ṛṣi Agastya ઋષિ અગસ્ત્ય delivers Upadeśa ઉપદેશ (to Rājā રાજા) about worshiping Śiva શિવ.

Proofread by Ruma Dewan

*Rishi Agastyaproktam Shivarchanopadesham 4*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*